रत्नमालासमायुक्तो रक्तगौरश्च ब्रह्मवत् ।
चतुर्भुजः पद्मविद्यावरशक्तिधरस्तथा ।
शिशुमारशिरश्चैव तुल्यकायो जलोत्करैः ॥
तं जातञ्च तथाभूतं शान्तनुर्लोकशान्तनुः ।
चतुर्णां पर्व्वतानाञ्च मध्यदेशे न्यवेशयत् ॥
कैलासस्योत्तरे पार्श्वे दक्षिणे गन्धमादनः ।
जारुधिः पश्चिमे शैलः पूर्ब्बे सम्बर्त्तकाह्वयः ॥
तेषां मध्ये स्वयं कुण्डं पर्व्वतानां विधेः सुतः ।
कृत्वातिवबृधे नित्यं शरदीव निशाकरः ॥
तं तोयमध्यगं पुत्त्रमासाद्य द्रुहिणः स्वयम् ।
क्रमतस्तस्य संस्कारानकरोद्देहशुद्धये ॥
अथ काले बहुतिथे व्यतीते ब्रह्मणः सुतः ।
तोयराशिस्वरूपेण वबृधे पञ्च योजनान् ॥
तस्मिन् देवाः पपुः सस्नुर्द्वितीय इव सागरे ।
शीतामलजले ह्रदे देवस्याप्सरसां गणैः ॥
तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान् ।
चक्रे मातृवधं घोरमत्युग्रं पितुराज्ञया ॥
तस्य पापस्य मोक्षाय स्वपितुश्चोपदेशतः ।
स जगाम महाकुण्डं ब्रह्माख्यं स्नातुमिच्छया ॥
तत्र स्नात्वा च पीत्वा च मातृहत्यां व्यपानयत् ।
वीथिं परशुना कृत्वा तच्च क्ष्मामवतारयत् ॥*॥
अपि च ।
ब्रह्मकुण्डात् सृतः सोऽथ कासारे लोहिताह्वये ।
कैलासोपत्यकायान्तु न्यपतद्ब्रह्मणः सुतः ॥
तस्यापि सरसस्तीरं समुत्थाय महाबलः ।
कुठारेण दिशं पूर्ब्बामनयद्ब्रह्मणः सुतम् ॥
ततोऽपरत्रापि गिरिं हेमशृङ्गं विभिद्य च ।
कामरूपान्तरं पीठमवाहयदमुं हरिः ॥
तस्य नाम विधिश्चक्रे स्वयं लोहितगङ्गकम् ।
लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽभवत् ॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा ।
गोपयन् सर्व्वतीर्थानि दक्षिणं याति सागरम् ॥
प्रागेव दिव्ययमुनां स त्यक्त्वा ब्रह्मणः सुतः ।
पुनः पतति लौहित्ये गत्वा द्वादशयोजनम् ॥*॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात् ॥”
इति कालिकापुराणे ८४ । ८५ अध्यायः ॥
अन्यच्च ।
मीने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीम् ।
पिबेदशोककलिकाः स्नायाल्लौहित्यवारिणि ॥
पुनर्व्वसौ बुधे सम्ये चैत्रे मासि सिताष्टमीम् ।
लौहित्ये विरजे स्नायात् सर्व्वपापैः प्रमुच्यते ॥*॥
स्नानमन्त्रो यथा,—
“पृथिव्यां यानि तीर्थानि सरितः सागरादयः ।
सर्व्वे लौहित्यमायान्ति चैत्रे मासि सिताष्टमीम् ॥
ब्रह्मपुत्त्र महाभाग शान्तनोः कुलनन्दन ।
अमोघागर्भसम्भूत पापं लौहित्य मे हर ॥”
इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥

ब्रह्मपुत्त्री, स्त्री, (ब्रह्मणः पुत्त्री कन्या ।) सरस्वती नदी । इति हेमचन्द्रः । ४ । १५१ ॥ वाराहीकन्दः । इति राजनिर्घण्टः ॥

ब्रह्मपुरी, स्त्री, (ब्रह्मणः पुरी ।) विधातुर्धाम । यथा । भूलोकान्तरीक्षस्वर्गलोकादि ब्रह्माण्डोदरवर्त्ति च ब्रह्मपुरीनामकं त्रैलोक्यस्वरूपं मम हृदयमध्ये वाह्ये च सूर्य्यमण्डलमध्यवर्त्ति तेजसा स एकीभूतं ज्योतिरहमिति चिन्तयन् जपं कुर्य्यात् । इति गायत्त्रीव्याख्या ॥ * ॥ काशी । यथा,—
“विद्याप्रबोधोदयजन्मभूमि-
र्वारानसी ब्रह्मपुरी दुरत्यया ॥”
इति प्रबोधचन्द्रोदयनाटकम् ॥

ब्रह्मबन्धुः, पुं, (ब्रह्मणो बन्धुरिव ।) अधिक्षेपः । निन्दितब्राह्मणः । निर्द्देशः । अग्राह्यनामकब्राह्मणः । इत्यमरः ।३।३।१०३ ॥ तथा हि । अधिक्षेपे निन्दायां गम्ये अधिक्षेप्यो ब्रह्मबन्धुः । यथा ब्रह्मबन्धो ! किमेतत्ते इति । अधिक्षिप्यतेऽसौ अधिक्षेपोऽधिक्षेप्यः कर्म्मणि घञ् वा । ब्रह्मैव बन्धुरस्य नान्यः । ब्रह्मकर्म्माभावात् निन्दा अधिक्षेपे समासोऽभिधानात् । ब्रह्मबन्धुः निर्द्देशे यस्य देशान्नाम न गृह्यते स ब्रह्मबन्धुरितिनिर्द्दिश्यते इत्यर्थः । स्त्रियां (“ऊङुतः ।”४ । १ । ६६ । इति ऊङ् ।) ब्रह्मबन्धूः । ब्रह्मबन्धुर्ब्राह्मणजातिविशेषे च । ब्राह्मणजातिविशेषे निर्द्देशे ब्रह्मबन्धुरधिक्षेपे इति वोपालितः । इति भरतः ॥*॥ (यथा, मार्कण्डेये । ७५ । ६० ।
“ब्रह्मबन्धोः सुता न त्वं बाले ! नैव तपस्विनः ।
सुता त्वं मम यो देवान् कर्त्तुमन्यान् समुत्सहे ॥”)
तस्य दैहिकवधनिषेधो । यथा, भागवते १ स्कन्धे ।
“वपनं द्रविणादानं स्थानान्निर्यापणन्तथा ।
एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥”

ब्रह्मभूतिः, स्त्री, (ब्रह्मणो भूतिरङ्गसम्पदिव भूतिर्यस्याः ।) सन्ध्या । इति शब्दरत्नावली ॥ (ब्रह्मणो भूतिरुत्पत्तिर्यस्या इति विग्रहे वाच्यलिङ्गः ॥)

ब्रह्मभूमिजा, स्त्री, (ब्रह्मभूमेर्जायते या । ब्रह्मभूमि + जन + ड । टाप्) सिंहली । इति राजनिर्घण्टः ॥

ब्रह्मभूयं, क्ली, (ब्रह्मणो भावः । ब्रह्म + भू + “भुवो भावे ।” ३ । १ । १०७ । इति क्यप् ।) ब्रह्मत्वम् । इत्यमरः । २ । ७ । ५२ ॥ (यथा मनुः । १२ । १०२ ।
“वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् ।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ॥”
“अस्मिन्नेव लोके तिष्ठन् ब्रह्मभूयाय ब्रह्मत्वाय कल्पते ।” इति तट्टीकायां कुल्लूकभट्टः ॥ मोक्षः । यथा गीतायाम् । १४ । २६ ।
“मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
सगुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥”
“ब्रह्मभूयाय ब्रह्मभावाय मोक्षाय कल्पते समर्थो भवति ।” इति तट्टीकायां स्वामी ॥)

ब्रह्ममूर्द्धभृत्, पुं, (ब्रह्मणो मूर्द्धभृत् शिरोमणिरिव ।) शिवः । इति वटुकभैरवस्य वकारादिसहस्रनामान्तर्गतनाम ॥

ब्रह्ममेखलः, पुं, (ब्राह्मनां ब्रह्मणानां मेखला पुंवद्भावः ।) मुञ्जः । इति केचित् ॥

ब्रह्मयज्ञः, पुं, (ब्रह्मणो ब्रह्मणे वा यज्ञः ।) विधिना वेदस्याभ्यसनम् । शिष्याणामध्यापनञ्च । इत्यमरभरतौ ॥ यथा, मनौ । ३ । ७० ।
“अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥”

ब्रह्मयष्टिः, स्त्री, (ब्रह्मणो यष्टिरिव ।) भार्गी । इति शब्दरत्नावली ॥ (वृक्षविशेषः । यथा, गारुडे १९२ अध्याये ।
“ब्रह्मयष्टिफलं पिष्टं वारिणा तेन लेपतः ।
तेन दुष्टं रक्तदोषः प्रणश्यति न संशयः ॥”
ब्रह्मणो ब्राह्मणस्य यष्टिर्लगुडः । विप्रयष्टिः ॥)

ब्रह्मयोनिः, पुं, (ब्रह्मणो योनिरुत्पत्तिस्थानम् ।) ब्रह्मगिरिः । इति शब्दरत्नावली ॥ (ब्रह्मप्राप्तिकारणब्रह्मध्यानम् । यथा मनुः । १० । ७४ ।
“ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्म्मण्यवस्थिता ।
ते सम्यगुपजीवेयुः षट् कर्म्माणि यथाक्रमम् ॥”
“ये ब्राह्मणा ब्रह्मप्राप्तिकारणब्रह्मध्याननिष्ठाः स्वकर्म्मानुष्ठाननिरताश्च ते षट्कर्म्माणि वक्ष्यमाणान्यध्यापनादीनि क्रमेण सम्यगनुतिष्ठेयुः ॥”
इति तट्टीकायां कुल्लूकभट्टः ॥ अपरस्य ब्रह्मणो योनिरुत्पत्तिकारणम् । यद्वा ब्रह्म सत् योनिः सर्व्वेषामुत्पत्तिकारकं ब्रह्म । यथा, मुण्डकोपनिषदि । ३ । १ । ३ ॥
“यदा पश्यः पश्यते रुक्मवर्णम्
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ॥”
तीर्थविशेषः । यथा महाभारते ।३।८३।१३१।
“ब्रह्मयोनिं समासाद्य शुचिः प्रयतमानसः ।
तत्र स्नात्वा नरव्याघ्र ! ब्रह्मलोकं प्रपद्यते ॥”
ब्रह्मा योनिरुत्पत्तिकारणं यस्य इति विग्रहे वाच्यलिङ्गः । यथा रघौ । १ । ६४ ।
“त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ।
सानुबन्धा कथं न स्युः सम्पदो मे निरापदः ॥”
यथा च मार्कण्डेये । २३ । ३० ।
जगद्धात्रीमहं देवी मारिराधयिषुः शुभाम् ।
स्तोष्ये प्रणम्य शिरसा ब्रह्मयोनिं सरस्वतीम् ॥”)

ब्रह्मयोनी, स्त्री, (ब्रह्मा योनिरुत्पत्तिकारणं यस्याः । स्त्रियां पक्षे ङीप् ।) कुरुक्षेत्रे सरस्वतीतीरे पृथूदकनिकटे तीर्थविशेषः । तत्र ब्रह्मणा चत्वारो वर्णाः सृष्टाः । यथा,—
“सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम् ।
पृथूदके जप्यपरो नैनं श्वो मरणं लभेत् ॥
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्म्मिताः ।
पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः ॥
चतुर्व्वर्णस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत् ।
तस्याभिध्यायतः सृष्टिर्ब्रह्मणोऽव्यक्तजन्मनः ॥